Hiralal Mazumdar Memorial College for Women
LIBRARY
Dakshineswar, Kolkata – 700 035

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2022-23

## SANADSE03T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

1. सरलसुरगिरा देवनागरीलिप्या च यथेच्छं प्रश्नद्वयस्य उत्तरं लेख्यम्। 10×2 = 20

(क) विश्वनाथाचार्येण प्रतिपादितं काव्यप्रयोजनं सविस्तरम् वर्ण्यताम्।

(ख) साहित्यदर्पणमनुसृत्य विभावलक्षणं तस्य मुख्यभेदद्वयं च आलोच्येताम्।

(ग) साहित्यदर्पणमवलम्ब्य संक्षेपेण नायिकाभेदाः वर्ण्यन्ताम्।

(घ) साहित्यदर्पणस्यालोके रसस्वरूपं व्याख्यायताम्।

2. अधोलिखितेषु यथेच्छं श्लोकचतुष्टयस्य सरलसुरगिरा व्याख्या करणीया। 5×4 = 20

(क) हरत्यघं संप्रति हेतुरैष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्॥

(ख) नवानधोऽधो वृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शम्भुना॥

(ग) सितं सितिम्ना सुतरां मुनेर्वपु-र्विसारिभिः सौधमिवाथ लम्भयन्।
द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमकोचदच्युतः॥

(घ) महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे।
श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम्॥

(ङ) जगत्यपर्याप्तसहस्रभानुना न यन्नियन्तुं समभावि भानुना।
प्रसह्य तेजोभिरसङ्ख्यतां गतैरदस्त्वया नुन्तमनुत्तमं तमः॥

(च) निदाघधामानमिवाधिदीधितिं मुदा विकासं मुनिमभ्युपेयुषी।
विलोचने विभ्रदधिश्रितश्रिणी स पुण्डरीकाक्ष इति स्फुटोऽभवत्॥

अथवा

अधोलिखितेषु यथेच्छं विषयचतुष्टयमवलम्ब्य टीका लेखनीया। 5×4 = 20

कार्तस्वरम्, कंसकृषः, रथाङ्गपाणिः, धराधरेन्द्रः, कालत्रितयम्, शितिवासः।

3. अधोलिखितेषु यथेच्छं पञ्चानां प्रश्नानाम् उत्तरं प्रदेयम्। 2×5 = 10

(क) का आसीत् तत्रभवती रमा चौधुरी ? क आसीत् तस्याः पत्युः परिचयः ?

(ख) रमाचौधुरीदेव्या प्रणीतं ग्रन्थद्वयम् उल्लेख्यम्।

(ग) कः आसीत् तोतापुरी ?

(घ) रामकृष्णदेवस्य प्रसिद्धम् उक्तिद्वयम् उल्लिख्यताम्।

(ङ) कुत्रासीत् सारदादेव्याः पित्रालयः ? का आसीत् तस्याः जननी ?

(च) रासमणिदेव्याः परिचयः प्रदीयताम्।

(छ) कः आसीत् हृदयः ?

——×——